No. ४४८५

Title गायत्री पुरश्चरण प्रयोगः

Author ✗

Extent १२ Age सं. १८१७

Subject (धर्मशास्त्र) तन्त्रम्

गायत्रीपुरश्चरणप्रयोगः शारदातिलका
नुसारी

धर्म॰
दत्ता पैति॰
२००

ग्ग यन्त्री हलगता युधानां [illegible]
तिक्रमः अयम्

— कमल
— शंख
— कपाल
— अङ्कुश
— वर

काल —
चक्र —
पाश —
कोट कशा —
डा अभय —

विष्णु

श्रीगणेशाय नमः ॥ अथ गायत्रीपुरश्चरण प्रयोगः ॥ तत्राधिकारसिध्यर्थं यथाशक्ति प्राय
श्चित्तं कृत्वा करिष्यमाणपुरश्चरणपूर्वांगत्वेन विहितं गायत्र्यादि जपं करिष्ये ॥ इति सं
कल्प्य सप्रणवव्याहृति गायत्र्या अयुतजपं कृत्वा आपोहिष्ठेति सूक्तं एतोन्विंद्रमिति सू
क्तं च ॥ कृतं च सत्यमिति सूक्तं स्वस्तिन इं त्या घाः स्वस्तिमतीः स्वादिष्ठ येत्याद्याः पाव
मानीश्च सर्वा जपेत् ॥ ततस्तत्सवितुरित्यस्य च आचार्यं विश्वामित्रमृषिं तर्पयामि ॥ गाय
त्री छंदस्तर्पयामि ॥ सवितारं देवतां तर्पयामि ॥ इति तर्पणं कृत्वा ॥ कद्रुद्रायेति रुद्रसूक्ता
नि जपेत् ॥ ततः ॥ सुमुहूर्ते स्नातः कृतनित्यक्रियः पवित्रपाणिराचम्य प्राणानायम्य देशका
लौ संकीर्त्य अमुकशर्मणो मम सकलपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं चतुर्विंशति
लक्षजपात्मकं गायत्रीपुरश्चरणं करिष्ये अशक्तौ ब्राह्मणद्वारा चरिष्ये तदंगत्वेन निर्विघ्न १

तासिध्यर्थं गणपतिपूजनं स्वस्तिवाचनं नांदीश्राद्धं आचार्यादिवरणं यथाविभवं तत्पूजनं च
करिष्ये ॥ इति संकल्प्य ॥ स्वकर्तृके ब्राह्मणवरणाद्यभावः ततो गणपतिपूजनादि नांदीश्रा
द्धांतं कुर्यात् ॥ तत्र प्रजापतिः प्रीयतामित्यस्य स्थाने सविता प्रीयतामिति विशेषः ॥ तत
आचार्यं च ताजपकर्तारं तांश्च एते इति प्रसेकं जपकर्तृ ब्राह्मणवरणं तेषां यथाविभवमा
सनवस्त्रालंकारचंदनादिभिः पूजयेत् ॥ तत आचार्यो देशकालौ स्मृत्वा यजमानव
तोहमाचार्यकर्म करिष्ये इत्युक्त्वा यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा ॥ स्थानं त्य
क्त्वा तु तत्सर्वं यत्र स्थं तत्र गच्छतु ॥ इति सर्षपान्विकीर्य अपसर्पंतु ते भूता ये भूता भूमिसं
स्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया ॥ अपक्रामंतु भूतानि पिशाचाः सर्वतो
दिशः ॥ सर्वेषामविरोधेन ब्रह्मकर्म समारभे इति पठेत् ॥ ततः सूर्यः सोमो यमः कालः सं

ध्येमतान्यहःक्ष्पा॥पवनोदिक्पतिर्भूमिराकाशःखेचरामराः ब्राह्मंशासनमेस्यायकस्स
ध्वमिहसन्निधिमितिदेवताःप्रार्थयेत्॥ गुरवे॰ गणपतये॰ दुर्गायै॰ मातृभ्योनमः इतिनत्वा
भूतशुद्धिप्राणप्रतिष्ठामातृकान्यासान्विधायऋष्यादिन्यासान्कुर्यात्॥ यथा॥ ब्रह्मणेऋष
येनमःशिरसि॥ देवीगायत्र्यैछंदसेनमःमुखे॥ परमात्मनेदेवतायैनमःहृदि॥ पुनः॥ जमद
ख्य ५ ग्निभरद्वाजभृगुगौतमकश्यपविश्वामित्रवसिष्ठेभ्यऋषिभ्योनमःशिरसि॥ गायत्र्युष्णिगा
नुष्टुप्बृहतीपंक्तित्रिष्टुप्जगतीभ्यश्छंदोभ्योनमःमुखे॥ अग्निवाय्वादित्यबृहस्पतिवरु
णेंद्रविश्वेभ्योदेवेभ्योदेवताभ्योनमःहृदि॥ पुनःविश्वामित्रायऋषयेनमःशिरसि॥ गाय
2 त्र्यैछंदसेनमःमुखे॥ सवित्रेदेवतायैनमःहृदिपुनः॥ ब्रह्मणेऋषयेनमःशिरसि॥ देवीगा
यत्र्यैछंदसेनमःमुखे॥ परमात्मनेदेवतायैनमःहृदयेइतिविन्यस्यप्राणायामत्रयंकृ २

त्वा विश्वामित्रऋषये नमः शिरसि ॥ गायत्र्यै छंदसे नमः मुखे ॥ सवित्रे देवतायै नमः हृदि इ
ति विन्यस्य ॐ ब्रह्मणे नमः नाभौ ॐ विष्णवे नमः हृदि ॥ ॐ शिवाय नमः मूर्ध्नि ॥ इति प्रणवन्या
सः ॥ ॐ भूः नमः हृदि ॥ ॐ भुवः नमः मुखे ॥ ॐ स्वः नमः दक्षांसे ॥ ॐ महः नमः वामांसे ॥ ॐ जनः
नमः दक्षोरौ ॥ ॐ तपः नमः वामोरौ ॥ ॐ सत्यं नमः ॥ जठरे ॥ इति व्याहृतिन्यासः ॥ ॐ तं नमः पादद्व
योरंगुलिमूलेषु ॥ ॐ सं नमः उँगुल्फयोः ॥ ॐ विं नमः जानुनोः ॥ ॐ तुं नमः पाद(ऊरु)मूलयोः ॥ ॐ वं न
मः लिंगे ॥ ॐ रें नमः नाभौ ॥ ॐ णिं नमः हृदि ॥ ॐ यं नमः कंठे ॥ ॐ भं नमः ॥ करद्वयांगुलिमूले
षु ॥ ॐ गों नमः मणिबंधयोः ॥ ॐ दें नमः कूर्परयोः ॥ ॐ वं नमः बाहुद्वयमूलयोः ॥ ॐ स्यं नमः मुखे
ॐ धीं नमः नासिकायां ॐ मं नमः कपोलयोः ॥ ॐ हिं नमः अक्ष्णोः ॥ ॐ धिं नमः कर्णयोः ॥ ॐ यों नमः
भ्रुवोः ॥ ॐ यों नमः शिरसि ॥ ॐ नः नमः पश्चिमवक्त्रे चूडाधः ॥ ॐ प्रं नमः उत्तरवक्त्रे वामके

मस्तके

ॐ चोंनमः दक्षिणवक्त्रे दक्षकर्णे ॥ ॐ दंनमः पूर्ववक्त्रे मुखे ॥ ॐ यांनमः ॥ ऊर्ध्ववक्त्रे शिरसि ॥
इति वर्णन्यासः ॥ ॐ तत्नमः शिरसि ॐ सवितुःनमः ॥ भ्रूमध्ये ॐ वरेण्यंनमः नेत्रयोः ॐ भ
र्गःनमः मुखे ॐ देवस्यनमः कंठे ॥ ॐ धीमहिनमः हृदि ॥ ॐ धियःनमः नाभौ ॥ ॐ यःनमः गुह्ये
ॐ नःनमः जानुनोः ॥ ॐ प्रचोदयात्नमः पादयोः ॥ इति पदन्यासः ॥ ॐ आपोज्योतीरसोमृ
तंब्रह्मभूर्भुवःस्वरोम् शिरसि ॥ इति शिरोन्यासः ॥ ब्रह्मणे अंगुष्ठाभ्यांनमः ॥ विष्णवे तर्जनी
भ्यांस्वाहा ॥ रुद्रायमध्यमाभ्यांवषट् ॥ ईश्वराय अनामिकाभ्यांहुं सदाशिवायकनिष्ठिका
भ्यांवौषट् ॥ सर्वात्मने करतलपृष्ठाभ्यांफट् ॥ एवं हृदयादौ ॥ पादयोर्दन्तौ तु सर्वात्मने स्मातमि
ति आत्मनेपदयोगो ग्रंथकृतः सर्वत्राभिप्रेतः ॥ तथा च ब्रह्मात्मने हृदयायनमः इत्यादि ॥ सौ
प्रदायिकास्तु ॥ ॐ भूर्भुवः स्वः तत्सवितुर्ब्रह्मात्मने हृदयायनमः ॥ वरेण्यं विष्ण्वात्मने शिरः ॥ २

भर्गोदेवस्यरुद्रात्मनेशिखा ॥ धीमहिईश्वरात्मनेकवचं ॥ धियोयोनःसदाशिवात्मनेनेत्रं ॥ प्र
चोदयात्सर्वात्मनेअस्त्रं ॥ कन्यांतरेतु ॥ ब्रह्माविष्णुःक्रमाद्रुद्रईश्वरश्चसदाशिवः ॥ सर्वात्मा
तेजसेतेचव्याहृत्यादिषडंगकं ॥ ॐभूःब्रह्मतेजसेहृत्इत्यादि ॥ आदिपदात्व्याहृतित्रयं
इत्युक्तं ॥ ततःप्रणवव्याहृतिसहितगायत्र्यास्त्रिर्व्यापकंस्वस्याध्यानं ॥ मुक्ताविद्रुमहेमनीलध
धवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुनिबद्धरत्नमुकुटांतत्त्वात्मवर्णात्मिकां ॥ सावित्रींव
रदाभयांकुशाकशाःशुभ्रंकपालंगुणंशंखंचचक्रमथारविंदयुगलंहस्तैर्वहंतींभजे ॥ आशा
अश्वादेस्ताडनीरज्जुः ॥ शुभ्रमितिकपालस्यविशेषणंगुणं ॥ पाशं ॥ एवंध्यात्वा ॥ लंपृथिव्यात्म
कंगंधंकल्पयामि ॥ हं आकाशात्मकंपुष्पं ॥ यंवाय्वात्मकंधूपं ॥ रंवह्न्यात्मकंदीपं ॥ वंअबा
त्मकंनैवेद्यं ॥ दशवारंमूलंप्रजाप्यएवंमनसासंपूज्यबाह्यपूजांकुर्यात् ॥ त्रिकोणाष्टद

लभूपुरात्मकं यंत्रं ॥ पदार्थदर्शीयेत्तु ॥ त्रिगुणितविलसत्कर्णिकं सर्वतोभद्रमंडलं चतुरस्र
युतं यंत्रं त्रिकोणं त्वाद्यस्य त्रिगुणितोपलक्षणकलालप्रपंचसारे तथैवोक्तमित्युक्तं ॥ किंचित् ॥
त्रिगुणितत्रिकोणोज्ज्वलत्कर्णिकमष्टदलं चतुरस्रयुतं यंत्रमाहुः ॥ यथासंप्रदायं यंत्रं संपा
द्य तत्र सौरं पीठं पूजयेत् ॥ यथा ॥ मंडूकाय नमः ॥ कालाग्निरुद्राय नमः ॥ आधारशक्त्यै
नमः ॥ कूर्माय नमः ॥ धरायै नमः ॥ अमृतसागराय नमः ॥ श्वेतद्वीपाय नमः ॥ कल्पवृक्षे
भ्यो नमः ॥ मणिहर्म्याय नमः ॥ हेमपीठाय नमः ॥ इति संपूज्य ॥ आग्नेयादिकोणेषु प्रभू
ताय नमः ॥ विमलाय नमः ॥ साराय न ॥ समाराध्याय न ॥ मध्ये परमसुखाय नमः ॥ ततो मध्ये ॥
एवं अनंताय न ॥ पद्माय न ॥ आनंदमयकंदाय नमः ॥ संविन्नालाय नमः ॥ विकारमयकेसरे
भ्यो नमः ॥ प्रकृत्यात्मकपत्रेभ्यो नमः ॥ पंचाशद्वर्णकर्णिकायै नमः ॥ इंदुमंडलाय ॥ वह्निमं ७

उल्कायनमः। सूर्यमंडलायनमः। एवं पीठदेवतां संपूज्य॥ पीठशक्तीः पूजयेत्॥ यथा॥ रां दीप्तायैनमः। रीं सूक्ष्मायैनमः। रूं जयायैनमः। रें भद्रायैनमः। रैं विभूत्यै०। रों विमलायै०॥ रौं अमोघायै०। रं विद्युतायै०। रः सर्वतोमुख्यैनमः॥ स्वपुरत आरभ्याष्टदिक्षु मध्ये च पूजयेत्॥ ततः ब्रह्मविष्णुशिवात्मकाय सौराय योगपीठायनमः॥ इति पीठं संपूज्य॥ पीठकर्णिकायामादित्यं खं खखोल्कायनमइति मंत्रेण पूजयेत्॥ ततः स्ववामे त्रिकोणषट्कोणवृत्तचतुरस्रात्मकं यंत्रं विलिख्य तत्रास्त्रक्षालितमाधारं संस्थाप्य मं दशकलात्मने वह्निमंडलाय गायत्र्यर्घ्यपात्राधारायनमः॥ इति आधारं संपूज्य॥ अस्त्रक्षालितं पात्रं संस्थाप्य अं द्वादशकलात्मने सूर्यमंडलाय गायत्र्यर्घ्यपात्रायनमइति पात्रं संपूज्य क्षं लं हं सं षं शं वं लं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं लृं ॠं ऋं ऊं उं ईं इं आं अं इति वि

ओम मातृकां। गायत्रीं च पठन् जलं संपूर्य ऊं घोऽत्राक्षरात्मने चंद्रमंडलाय गायत्र्या अर्घ्यपा
त्राम्रलाय नमः॥ इति जलं संपूज्य गंगे च यमुने चैवेत्यादि मंत्रेण अंकुशमुद्रया जले तीर्थान्या
वाह्य हृदयादि दं वचावाहय षडंग मंत्रैरभ्यर्च्य शंखचक्रमुशलधेनुयोनिमुद्राः॥ संदर्श्य म
गा त्स्यमुद्रया छादयित्वाष्टवारं मूलमंत्रं जपेत्॥ अर्घ्योदकेनात्मानं पूजासाधनानि च त्रिः प्रोक्षे
त्॥ ततः पीठात्मनोर्मध्ये विशेषार्घ्यस्थापनं॥ सामान्यार्घ्यवत्॥ वै. चित्रा॥ अर्घ्यस्थापनोत्त
रं पीठपूजां कुर्वीत॥ ततः गायत्र्यायंत्रे मूर्तिं परिकल्प्य पूर्वोक्त ब्रह्मादिरूपादीन् समस्ताग्रा
ण्नायम्य हृत्कमले चित्कलारूपां वक्ष्यमाणावरणसहितां ध्यात्वा। मनसा पुष्पांजलिं
दत्वा हस्ते पुष्पांजलिं गृहीत्वा गायत्रीमंत्रेण वहन्नासापुटरंध्रेण बहिरानीय पुष्पसं
चये संयोज्य तत्र सावरणां ध्यात्वा यंत्रकाल्पितमूर्तौ निवेश्य आवाहनादिमुद्राः॥ ५

प्रदर्शयेत्॥ आवाहिता भव॥ स्थापिता भव। सन्निहिता भव। संनिरुद्धा भव॥ संमुखीकृता भ
व सकलीकृता भव॥ अवगुंठिता भव। अमृतीकृता भव। परमीकृता भव॥ ततः प्राणप्रतिष्ठां कु
र्यात्॥ यथा॥ ओं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः गायत्र्याः प्राणा इह प्राणाः। ओं ह्रीं क्रों इत्यादि हंसः
इत्यंतमुक्त्वा गायत्र्या जीव इह स्थितः पुनः ओं ह्रीं क्रों हंसः गायत्र्याः सर्वेंद्रियाणि पुनः ओं
ह्रीं क्रों हंसः गायत्र्या वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥ इ
ति मंत्रेण त्रिरावृत्त्या प्राणान्प्रतिष्ठाप्य ध्यायेत्॥ मुक्ताविद्रुमेत्यादिश्लोकोक्तप्रकारेण ध्या
त्वा मंत्रेण पाद्यादिपुष्पांतानुपचारान्कृत्वा पुष्पांजलिं दत्वा प्रसन्नां विभाव्य तदाज्ञया
आवरणपूजां कुर्यात्॥ गायत्र्यै नमः। सावित्र्यै नमः। सरस्वत्यै नमः॥ त्रिकोणे स्वाग्रत आ
रभ्य कोणत्रये प्रादक्षिण्येन पूजयेत्॥ ब्रह्मणे नमः॥ विष्णवे नमः॥ रुद्राय नमः॥ कोणे

नराग्नेवृस्थितवक्षिवरुणेशानादिक्षु पूजयेत् ॥ पुष्पांजलिं गृहीत्वा मूलमुच्चार्य अभिष्टसि
द्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनमिति पुष्पांजलिं
दत्वा देव्या हस्ते जलं क्षिपेत् ॥ इति प्रथमावरणं ॥ आदित्याय नमः ॥ रवये नमः ॥ भान
वे नमः ॥ भास्कराय नमः ॥ सूर्याय नमः ॥ वृत्तिकायामादित्यं संपूज्य परिधौ चतुर्दिक्षु र
व्यादीन्पूजयेत् ॥ उषायै नमः ॥ प्रज्ञायै नमः ॥ प्रभायै नमः ॥ संध्यायै नमः ॥ एता विदिक्षु मू
लेन पुष्पांजलिं गृहीत्वा अभीष्टसिद्धिमित्यादि पूर्ववत् ॥ द्वितीयावरणार्चनमिति विशेषः
इति द्वितीयावरणं ॥ ब्रह्मणे हृदयाय नमः ॥ विष्णवे शिरसे स्वाहा रुद्राय शिखायै वषट् ॥ ई
श्वराय कवचाय हुं ॥ वह्निस्थित अग्नीशासुरवायव्येषु केसरेषु संपूज्य ॥ सदाशिवाय नेत्रत्र
याय वौषट् ॥ इति देव्याः पुरतः संपूज्य सर्वात्मने अस्त्राय फट् इति पुरतश्चारभ्य केसरे ६

पुर्ववत्तु दिक्षु पूजयेत्॥ मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट० तृतीयावरणार्चनं॥ इति पूर्ववत्॥ इति तृतीयावरणं॥ प्रह्लादिन्यै नमः॥ प्रभायै नमः॥ नित्यायै नमः॥ विश्वंभरायै नमः॥ विलासिन्यै नमः॥ प्रभावत्यै नमः॥ जयायै नमः॥ शान्त्यै०॥ स्वाग्रत आरभ्याष्टसु दलेषु॥ मूलेन पुष्पांजलिं गृहीत्वा॥ अभिष्टेत्यादि चतुर्थावरणार्चनमिति॥ पूर्ववत्॥ इति चतुर्थावरणं॥ कान्तायै नमः॥ दुर्गायै॥ सरस्वत्यै नमः॥ विश्वरूपायै॥ विशालायै०॥ ईशायै०॥ व्यापिन्यै०॥ विमलायै०॥ पूर्वत आरभ्य दलेष्वेव पूजयेत्॥ मूलेन पुष्पांजलिं गृहीत्वा अभिष्ट पंचमावरणार्चनमित्यादि॥ इति पंचमावरणं॥ तमोपहारिण्यै०॥ सूक्ष्मायै०॥ विश्वयोन्यै०॥ जयावहायै०॥ पद्मालयायै०॥ परायै०॥ शोभायै॥ भद्ररूपायै०॥ पुरत आरभ्य दलेषु॥ मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट०॥ षष्ठमावरणार्चनमित्यादि॥ इति षष्ठमावरणं॥ ब्राह्म्यै०॥ मा

हेश्वर्यै॰ ॥ कौमार्यै॰ वैष्णव्यै नमः ॥ वाराह्यै॰ ॥ इन्द्राण्यै॰ ॥ चामुण्डायै॰ ॥ अरुणाय नमः ॥ पुरतआ
रभ्य दलाग्रेषु पूजयेत् ॥ मूलेन पुष्पांजलिं गृहीत्वा अभिष्ट॰ सप्तमावरणार्चनमित्यादि पूर्वव
त् ॥ पद्मपादाचार्यास्तु ॥ महालक्ष्मीमष्टमीं संपूज्य पुरतोऽरुणमर्चयेत् ॥ इति अरुणपूजाम
धिकमाहुः ॥ अथ सप्तमावरणं ॥ ततो बहिः चन्द्राय॰ ॥ बुधाय॰ ॥ बृहस्पतये॰ ॥ शुक्राय॰ ॥ पुरत
आरभ्य चतुर्दिक्षु ॥ भौमाय॰ ॥ शनैश्चराय॰ ॥ राहवे॰ ॥ केतवे॰ ॥ विदिक्षु मूलेन ॥ पुष्पांजलिं
7 गृहीत्वा अभिष्ट॰ अष्टमावरणार्चनमित्यादि ॥ इत्यष्टमावरणं ॥ इन्द्राय नमः ॥ अग्नये न
मः यमाय नमः ॥ निर्ऋतये नमः ॥ वरुणाय नमः ॥ वायवे नमः ॥ सोमाय नमः ॥ ईशानाय॰ ॥
॥ इत्यष्टमावर्णं ॥ चतुरस्रे ॥ प्रसिद्धपूर्वादिदिक्षु ॥ अनन्ताय नमः ॥ पश्चिमनैर्ऋतमध्ये॰ ॥ ब्रह्म
णे नमः पूर्वेशानमध्ये मूलेन पुष्पांजलिं गृहीत्वा अभीष्ट॰ नवमावरणार्चनमित्यादि ॥ ॰॥

॥ इति नवमावरणं ॥ वज्रायनमः ॥ शक्त्यै । दंडाय नमः । खड्गाय ॥ पाशाय ॥ अंकुशाय ॥ गदायै ॥ त्रिशूलायै । चक्राय । पद्माय ॥ पूर्ववत्सञ्जयेत् ॥ मूलेन पुष्पांजलिं दत्वा अभिष्टसिद्धिं मे देहि शरणागतवत्सले ॥ अनया समर्पयेत् तुभ्यं दशमावरणार्चनं इति देव्या हस्ते जलं दद्यात् ॥ इति दशमावरणं ॥ ततः अवशिष्टपूजां समाप्य पुष्पांजलिं दत्वा देवीं प्रसन्नां विभाव्य स्वात्मानं देवीस्वरूपं ध्यात्वा सपूज्य ऋष्यादिन्यासं कृत्वा देवीगुरुमंत्रात्मनां ज्योतीरूपे ऐक्यं विभावयेत् ॥ एवं यावत्स्वयोगसमाप्तिस्तावत्स्वसहं पूजां कुर्यात् ॥ इति पूजाविधिः

॥ अथ जपः ॥ तिथ्यादिसंकीर्त्य संकल्पितपुरश्चरणसमाप्तिपर्यंतं अमुकसंख्याकजपमहं करिष्ये ॥ इति संकल्प्य देवगुर्वादिस्मरणं विधाय प्राणायामत्रयं कृत्वा पूर्वोक्तऋष्यादिन्यासान्कृत्वा ऽशक्तौ षडंगमात्रं विधाय देवतां ध्यायन् जपं कुर्यात् ब्राह्मणद्वारा करणेन तु

८

यजमानवृतो ब्राह्मण एवंकृतः शुद्धदेशो कुशाद्यासने उपविश्य पवित्रपाणिराचम्य प्राणा
नायम्य आसनविधिमूलोत्सारणादिकलशमूलशुद्धिप्राणप्रतिष्ठामातृकान्यासान्वि
धाय जपं संकल्प्य त्रिःप्राणानायम्य कृष्यादिस्मरणपूर्वकं कृष्यादिन्यासान्विधाय स
वितारं देवतां ध्यात्वा संस्कृतां मालां प्रोक्ष्य ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ॥ चतु
र्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥ ह्रीं अक्षमालायै नमः ॥ इति संप्रार्थ्य ॐ अ
विघ्नं कुरु माले त्वं जपकाले सदा मम ॥ त्वं बीजं सर्वमंत्राणामिष्टसिद्धिकरी न वेति ता
मादाय हृदयसान्निध्ये मालां धारयन्मध्यमामध्यपर्वणि निधायोन्नतगात्रः स्वस्व
टादिशाद्भुमकुर्वन् मध्याह्नेनाचघिलरायां सार्द्धप्रहरत्रयपर्यंतं जपेत् ॥ अंते पुनः
प्रणवमुच्चार्य त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव ॥ शिवं कुरुष्व मे भद्रे यशो वीर्यं ८

चसर्वदा ॥ ह्रीं सिद्ध्यै नमः ॥ इति मालां शिरसि निधाय गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्म
त्कृतं जपं ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादाद्बुद्धिस्थिता ॥ इति जपं समर्प्य पुनर्न्यासान्कुर्यात्
॥ इति जपविधिः ॥ एवं समाप्ते जपे तिथ्यादि संकीर्त्य एतैर्गायत्रीपुरश्चरणे सांगतासि
द्ध्यर्थं होमं करिष्ये इ संकल्प्य यथाचारं गणपतिपूजनादिकं साकुलिकसदस्यादिव
रणं तु कुर्यात् ततो यथोक्तविधिना अग्निं प्रतिष्ठाप्य ग्रहावाहनादिकलशस्थापनांते
कृताज्यभागांते गायत्रीपुरश्चरणहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये इति संक
ल्प्यास्मिन्नन्वाहितेऽग्नौ वित्यादि चक्षुषी आज्येनेत्यंते अत्र प्रधानं आदित्यादिग्रहा
न् अर्कादिजातीयसमिदाहुतिभिश्च वीज्याहुतिभिश्चाष्टसंख्याकाभिः पुनस्त्र
प्रधानं सवितारं सहस्रत्रयसंख्याकाभिर्दुग्धाभिश्चैदनाहुतिभिस्तावतीभिस्तिला

कृतिभिस्त्रावतीभिर्दूर्वाभिस्त्रावतीभिरर्कसमिद्भिस्त्रावतीभिरश्वत्थसमिद्भिस्त्रावतीभि
र्वटसमिद्भिस्त्रावतीभिरुदुंबरसमिद्भिस्त्रावतीभिः प्लक्षसमिद्भिरावरणदेवताभ्यो
कैकया घृताक्तं तिलाहुत्या शेषेणैतासां। पर्यग्निकरणे काले चर्वादिभिः सहाज्यस्य
पर्यग्निकरणं॥ यथान्वाधानं काले इदं सवित्रादिभ्यो न मम। इदं सवित्रे इत्येवं त्या
गः॥ दूर्वात्रयस्यैकाहुतिः॥ काले बलिनौ दोदिक्पाली कुर्यात्तन्त्रशेषं समाप्य समुद्र
ज्येष्ठादयस्याभिषेकान्ते प्रत्येकं धेनुनिष्क्रयसंकल्पः॥ विसर्जनादि ब्राह्मणभोजनं सं
कल्प्यान्ते कर्म ईश्वरार्पणं कुर्यात्॥ पदार्था दर्शितास्तु॥ क्षीरं॥ ओदनं॥ तिलाः॥ दूर्वाः॥ इ
तिद्रव्यचतुष्टयं॥ क्षीरद्रुमाश्वत्थोदुंबरप्लक्षवटाः एवमष्टद्रव्याणि प्रत्येकं त्रित्रि
सप्तत्रिंशदित्युक्तं॥ प्रपंचसारेतु॥ पायसघृततिलदूर्वाक्षीरद्रुमचतुष्टयं एवमष्टौक्ताः ऐ

नि॥ इति होमविधी॥ एवं होमं समाप्य जले देवं संपूज्य होमदशांशेन गायत्र्यां तेसविता
रं तर्पयामि नमः इति तर्पणं कार्यं॥ तर्पणदशांशेन गायत्र्यां ते आत्मानमभिषिंचामि नम
इति स्वमूर्द्ध्नि मार्जनं कार्यं॥ असंभवे द्विगुणो जपः। षडंगविहीयेत तस्य स्याद्द्विगुणो ज
पः इति वचनात्॥ अभिषेकदशांशेन ब्राह्मणभोजनं। अशक्तौ। शक्तस्तु यथेष्टं ब्राह्मण
भोजनं कुर्यात्॥ ब्राह्मणभोजनेनैव देवता प्रसीदति॥ ब्राह्मणान् दक्षिणादिभिस्तोष
यित्वाशिषो गृहीत्वा पुरश्चरणं पूर्णमस्त्विति वाचयित्वा कर्मैश्वरार्पणं कुर्यात्॥ आ
रंभप्रभृति यावत्समाप्तिः कर्त्ता ब्राह्मणैः सह हविष्याशी सत्यवागधःशायी भवेत्॥
यज्जाग्रत इति शिवसंकल्पमंत्रांस्त्रिः पठित्वा प्रत्यहं शयीत॥ अथ मालासंस्कारः॥ कु
शोदकसहितैः पंचगव्यैर्मालां प्रक्षाल्य अं आं इत्यादि क्षं इत्यंतानि मातृकाक्षरा

ऐंअष्टद्रव्याकारतयास्थापितेषुनवसुअश्वत्थपत्रेषुस्थापितमालायांविन्यस्यॐस
द्योजातं·ॐवामदेवाय·ॐअघोरेभ्यः·ॐतत्पुरुषायः ॐईशानः।इतिपंचमंत्रान्जा
त्वाताःएतेषांमध्येप्रथमेनपंचगव्येनक्षालनंजलेनचमालांप्रक्षाल्यद्वितीयेन
चंदनादिनाविघृष्य॥तृतीयेनमालांधूपयित्वाचतुर्थेनचंदनकस्तूर्यादिनालेप
यित्वापंचमेनप्रतिमणिशतसहस्रंस्पृष्ट्वा॥प्रत्येकंमंत्रयेन्मंत्रीपंचमेनसहस्रंस्पृष्ट्वेतिवि
चनात्तमभिमंत्रयेत्॥अघोरेभ्यइतिमंत्रेणमेरुंशतवारंमालायांवाशतजपः।समु
द्रायमालामपितत्पंचमेनैवसहस्रेणस्नातान्यनेनमंत्रयेदितिवचनात्तमभिमंत्र्यए
तैरेवपंचभिर्मंत्रैर्मालांपंचोपचारैरिष्टदेवताबुद्ध्यापूजयेत्॥इतिमालासंस्कारः॥एवंच
तुर्विंशतिलक्षजपात्मकंपुरश्चरणंमंत्रस्योशादावप्युक्तं॥परिजातोदाहृतेऽरूप्यविधा १०

नेलु॥ अथ वेदादिगीतायाः प्रसादजननं विधिं॥ गायत्र्याः। संप्रवक्ष्यामि धर्मकामा
र्थमोक्षदं॥ मध्याह्ने मितभुङ्मौनी त्रिःस्नानार्चनतत्परः। जपेल्लक्षत्रयं धीमान्ध्यान
ध्यानसत्क्रिय इति त्रिलक्षं पुरश्चरणमुक्तं कृता॥ कृतयुगे जपो विहितः॥ अतो द्वाद
शलक्षैः पुरश्चरणं भवति॥ तत्र संकल्पस्तथैवोक्तः॥ द्वादशलक्षात्मकं पुरश्चरणं करिष्ये
इति सविताऽरं द्वादशसहस्रतिलाहुतिभिः सन्तर्पयेदिति च तत्रैवोक्तं॥ इति रूपकरना
रायणभट्टात्मजश्रीकृष्णभट्टतः शारदातिलकानुसारी गायत्रीपुरश्चरणप्रयोगः सं
वत् १८१७ रामभूवसुभूसंख्ये वत्सरे व्ययसंज्ञके माघमासे सितपक्षे भृष्टम्यां गुरुवा
सरे श्रीकृष्णेन व्यवस्थाप्यापोरश्चरणकं विधिं॥ अथ मुद्रालक्षणानि॥ अनामाङ्गुष्ठसं
लग्नांगुष्ठानां जपिरीरिता। देवाह्वानकरी चैषा मुद्रावाहनसंज्ञिका॥ १॥ अधोमुखीकृता

सैवप्रोक्तास्थापनकर्मणि ॥२॥ आश्लिष्टमुष्टियुगलात्प्रोन्नतांगुष्ठयुग्मका । संनिधाने
समुद्दिष्टा मुद्रेयं तंत्रवेदिभिः ॥३॥ अंगुष्ठगर्भिणी सैव संनिरोधे समीरिता ॥४॥ उत्तानमुष्टि
युगलात्संमुखीकरणी मता ॥५॥ देवतांगे षडंगानां न्यासः स्यात्सकलीकृतिः ॥६॥ सव्यहस्त
कृतामुष्टिर्दीर्घाधोमुखतर्जनी ॥ अवगुंठनमुद्रेयमभितो भ्रामिता सती ॥७॥ वामांगुली
नां मध्ये तु दक्षिणांगुलीरथ ॥ नियोजतर्जनीं दक्षां मध्यया वामया तथा ॥ दक्षमध्यमया
वामां तर्जनीं च नियोजयेत् ॥ वामयानामया दक्षां कनिष्ठां च नियोजयेत् ॥ दक्षयानाम
या वामां कनिष्ठां विनियोजयेत् ॥ विहिताधोमुखी चैषा धेनुमुद्रा प्रकीर्तिता ॥८॥ अन्यो
न्यग्रथितांगुष्ठा प्रसारितकरांगुली ॥ महामुद्रेयमुदिता परमीकरणे बुधैः ॥९॥ प्रयोज
येदिमां मुद्रां देवतायागकर्मणि ॥ वामांगुष्ठं तु संगृह्य दक्षहस्तस्य मुष्टिना ॥ कृत्वो ११

ततो नं दक्षमुष्टिमंगुष्ठं तु प्रसारयेत् ॥ वामांगुल्यस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः । दक्षि
णांगुष्ठके लग्ना मुद्रा शंखस्य भूतिदा ॥ ४ ॥ हस्तौ तु संमुखौ स्लता संलग्नौ सुप्रसारितौ ॥ क
निष्ठांगुष्ठकौ लग्नौ मुद्रैषा चक्रसन्निभा ॥ ५ ॥ मुष्टी कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणं
॥ कुर्यान्मुसलमुद्रेयं सर्वविघ्ननिवारिणी ॥ ६ ॥ मिथः कनिष्ठिके बध्वा तर्जनीभ्यामनामि
के ॥ अनामिकोर्ध्वसंश्लिष्ट दीर्घमध्यमयोरधः ॥ अंगुष्ठाग्रद्वयं न्यस्य योनिमुद्रेयमीरिता
॥ ७ ॥ वामोपरिष्टात्तस्याप्य दक्षहस्तं प्रसारयेत् ॥ अंगुष्ठौ तु तयोः पार्श्वे मत्स्यमुद्रेय
मीरिता ॥ ८ ॥ इति मुद्रालक्षणानि ॥ संवत् १९१७ नामाघबदी ९ वारशनि ॥ श्री ॥ ॥

धर्मः

रत्ना पैतिः

२०